**Jerk,** *v. t.* ( सहसा ) चल् c., वि-धू 6 P, 5, 9 U; लघु-सहसा तड् 10 or प्रह् 1 P, अकस्मात्-सवेगं-क्षिप् 6 P. -*s.* चालनं, लघुप्रहारः, लघ्वाघातः, लघु-आकास्मिक-क्षेपः.

**Jerkin,** *s. See* **Jacket.**

**Jessamine,** *s. See* **Jasmine.**

**Jest,** *s.* परि( री )हासः, नर्मन् *n.*, हास्यं, विनोदोक्ति *f.*, प्रहसनं, विनोदभाषणं, परिहासोक्तिः, नर्मालापः; 'truce to ( fie upon ) your j. s' धिक्प्रहसनं ( U. 4. ), अलं परिहासेन; 'uttered in j.' परिहासजल्पितं; 'made a j. of the matter' तमर्थं परिहासमिव मेने. **2** खेला, क्रीडा, केलि *f.*, कौतुकं; 'in j.' परिहासेन, परिहासपूर्वं. -*v. i.* परिहस् 1 P, विनोद-परिहास-वाक्यं वद् 1 P or उदीर् c.; क्रीड् 1 P. **-er,** *s.* वैहासिकः, परिहासयितृ *m.*, परिहास-विनोद-कारिन् *m.*, भंडः, चाटुपटुः; 'king's j.' विदूषकः, नर्मसचिवः. **-ingly,** *adv.* परिहासपूर्वं, सपरिहासं, सविनोदं.

**Jet,** *s.* जलोत्क्षेपः. **2** कृष्णप्रस्तरः; 'j.-black' घनकृष्ण, अतिकृष्ण. **-ty,** *a.* कृष्णवर्ण.

**Jewel,** *s.* मणि *m. f.*, रत्नं; 'j. of a woman' स्त्रीरत्नं; 'j.-house' मणिशाला, रत्नागारं; 'j.-mine' रत्नाकरः, रत्न-मणि-खनि *f.*-भूमि *f.* **-led,** *a.* रत्नवत्, मणि-रत्न-मय ( यी *f.* ), रत्नसनाथ, मणि-रत्न-खचित, रत्नानुविद्ध. **-ler,** *s.* रत्नाजीविन् *m.*, मणिकारः, रत्नकारः. **-Jewelry,** *s.* रत्नानि ( pl. ), रत्नादिकोशः-षः.

**Jiffy,** *s.* निमेषः, क्षणः.

**Jig,** *s.* नृत्यविशेषः. **2** वंचना, व्याजः, छलं.

**Jilt,** *s.* प्रतारिका, चपला, वंचिका, संकेतलंघिनी. -*v. i.* प्रेमसंकेतं लंघ् 1 A, 10, प्रेमविषये वंच् 10, or प्रतॄ c., खंड् 10.

**Jingle,** *v. i.* शिंज् 2 A, 10, क्वण् 1 P, वि-रु 2 P, झणझणायते ( D. ), कलं स्वन् 1 P -*s.*, **-ing,** *s.* शिंजितं, शिंजा, झणत्कारः, झणझणस्वनः, क्वणितं, क्वणनं, कलरवः.

**Job,** *s.* कार्यं, कृत्यं, व्यापारः, क्रिया. **2** लघु-क्षुद्र-नीच-क्रिया. **3** स्वार्थपरं कार्यं, आत्मवृद्ध्यर्थं कर्मन् *n.* -*v. i.* क्षुद्रकर्माणि कृ 8 U, स्वार्थमुद्दिश्य कार्यं कृ. **2** पण् 1 A. **3** *v. t.* अपव्यय् 4 P. **-ber,** *s.* क्षुद्रकर्मकारिन् *m.*, परार्थं क्रयविक्रयकारिन् *m.*, स्वार्थप्रवर्तकः, क्रयविक्रयिन् *m.* **-bing,** *s.* क्षुद्रकर्मव्यवसायः, स्वार्थप्रवृत्ति *f.*

**Jockey,** *s.* अश्वज्ञः, हयज्ञः, अश्वविद् *m.*, अश्वकोविदः, अश्वविद्याविशारदः. -*v. t.* अश्वज्ञ इव प्रतॄ c. or वंच् 10. **-ism,** *s.* अश्वविद्या-शिक्षा.

**Jocose, Jocular,** *a.* हास्यकर ( री *f.* ), विनोदिन्, हास्यावह, विनोदात्मक, सरस, हास्यगर्भ, सकौतुक; (of persons) परिहासशील, परिहासक, विनोद-नर्मालाप-पर, कौतुकिन्. **-ly,** *adv.* परिहासेन, परिहासपूर्वं, सकौतुकं, विनोदार्थं, रसिकवत्. **-ness, -ity,** *s.* परिहासशीलता, रसिकता, विनोदः, कौतुकं, उल्लासः, हर्षः, प्रमोदः.

**Jocund,** *a.* प्र-,हृष्ट, प्र-,मुदित, आनंदवृत्ति. **-ity,** *s.* उल्लासः, प्रहर्षः, आनंदः; *See* **Glad.**

**Jog,** ( on ) *v. i.* मंदं मंदं प्रसृप् 1 P or चल् 1 P or सृ 1 P. -*v. t.* अरत्निना तड् 10, ईषत् चल् c. -*s.* ईषदाघातः, ईषत्प्रहारः-चालनं; 'j.-trot' गज-मंद-गति *f.*, मंदप्रयाणं.

**Join,** *v. t.* युज् 7 U, 10, सं-आ°-,संसंज् 1 P, यु 2 P, संश्लिष् c., सं-धा 3 U, संबंध् 9 P, संहन् 2 P, एकत्र कृ 8 U, संग्रंथ् 9 P, योक्त्रयति ( D. ), घट् c. ( घटयति ), संपृच् 2 A, 7 P. **2** ( Go to ) समुपागम् 1 P, संइ 2 P, संमिल् 6 P, संगम् 1 A; pass. of roots above( with instr. ); 'j. hands' अंजलिं बंध् 9 P, प्रां( सां )जलि-*a.* भू, हस्तौ समा-नी 1 P; 'j. ed their hands in marriage' विवाहविधिना ताभ्यां अन्योन्यपाणिग्रहणं कारयामास, वधूवरं संगमयांचकार **-ed,** *a.* युक्त, युत, संयुक्त, संयुत, संश्लिष्ट, संहत, सं-समा-सक्त, लग्न, संलग्न, संबद्ध, संपृक्त, संहित, सहित, संगत, समेत, मिलित, घटित. **-er,** *s.* तक्षकः, रथकारः, सूत्रधारः, तष्टृ *m.*, तक्षन् *m.*, काष्ठतक्ष् *m.*, वर्धकिः. **-ery,** *s.* काष्ठतक्षणं. **-ing,** *s.* सं-,योगः, संधिः, संसर्गः, संधानं, संश्लेषः, संघात संगमः, संसक्ति *f.* **-Joint,** *s.* संधिः, पर्वन् *n.*, ग्रंथिः, कांडः-डं, अस्थिग्रंथिः-संधिः; 'out of j.' विलग्न, विसंधि. -*a.* संयुक्त, समवेत, एककार्यप्रवृत्त, सहत. **2** असंविभक्त, अविभक्त, साधारण ( णी *f.* ), सामान्य, सह in comp.; संघातवत्, संभूयकारिन्; 'j. proprietor' सहाधिकारिन् *m.*; 'j. family property' संसृष्टधनं; 'members of a j. family' संसृष्टाः, संसृष्टिनः; 'with j. labour' संभूयश्रमेण, विंशत्यत्नेन; 'j. [illegible] company' संभूयसमुत्थानं; 'j.-heir' [illegible] *m.*, संविभागिन् *m.*, समांशहरः, समांशिन् *m.* -*v. t.* संधियुक्त-*a.* कृ; ex. by (*s.*). **-ed,** *a.* संधिविशिष्ट, ग्रंथिल, संधि-ग्रंथि-युक्त, पर्ववत्. **-ly,** *adv.* समं, सह, संभूय, संयोगेन, सहितं, समवायेन, एकीभूय, एकचित्तीभूय, युगपत्. **-Jointure,** *s.* विधवाधनं; स्त्रीधनं.

**Joke,-er,** *See* **Jest,-er.**

**Jole,** *s.* गंडः, कपोलः.

**Jolly,** *a.* प्र-,हृष्ट, सानंद, उल्लसित, प्रमोदिन्, हृष्ट-प्रीत-हृदय; परिहासशील, विनोदिन्, विलासिन्, विनोदशील. **-ity,** *s.* उल्लासः, आनंदः, प्र-,हर्षः, प्रमोदः, उत्सवः. **-ness,** *s.* विनोदपरता, प्रहासः,

**Jolt,** *v. t.* संक्षुभ् 9 P or c. -*v. i.* क्षुभ् 1 A, 4 P. -*s.*, **-ing,** *s.* संक्षोभः, उद्घातः, आकास्मिकक्षेपः.